# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–नवम्बर/दिसम्बर–२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्रीप्रथम, सेमेस्टर-१ | प्रश्नपत्रम् - ७ | गुणाः - ७० |
| विषयः - धर्मशास्त्रम् | कोड - CE-1.1.1 | समयः - ०३-०६ |
| दिनाङ्कः - १२.१२.२०१६ | ग्रन्थः - पाराशरस्मृतिः अध्याय १ तः ६ | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ निम्नाङ्कितप्रश्नेषु द्वयोः ससन्दर्भ व्याख्या कार्या ।** **०८**

(१) *न कश्चिद्वेदकर्ता च वेदस्मर्ता चतुर्मुखः ।*
*तथैव धर्मान्स्मरति मनुः कल्पान्तरेऽन्तरे ॥*

(२) *पुष्पं पुष्पं विचिनुयात् मूलच्छेदं न कारयेत् ।*
*मालाकार इवारामे न यथाङ्गारकारकः ॥*

(३) *वृक्षांश्छित्वा महीं भित्वा हत्वा च कृमि कीटकान् ।*
*कर्षकः एकयज्ञेन सर्वपापैः प्रमुच्यते ॥*

**प्रश्नः २ एकस्य निबन्धात्मकं वर्णनं कुरुत ।** **०८**

(१) *चातुर्वर्ण्यविचारः ।*

(२) *गृहस्थधर्माचारः ।*

**प्रश्नः ३ द्वयोः टिप्पणी कार्या ।** **०४**

*(१) षड्गवं ।* *(२) शौचाचारः ।*
*(३) कल्पः* *(४) कृषिकर्म ।*

**प्रश्नः ४ निम्नाङ्कतेषु पञ्चानं लघूत्तराणि लिखत ।** **०५**

(१) *केषां अन्नं न भोक्तव्यम् ?*

(२) *ये वैश्वदेवं वा आतिथ्यं न कुर्वन्ति ते कुत्र गच्छन्ति ?*

(३) *शूद्रस्य कः परमः धर्मः ?*

(४) *प्रथमाध्याये किं वर्णितम् ?*

(५) *गवां प्रतिपालनम् कस्य वर्णस्य धर्मः ?*

(६) *ये शूद्राः द्विजादिवर्णानां सेनां त्यजन्ति ते कीदृशाः भवन्ति ?*

(७) *प्रथमाध्याये कति श्लोकाः ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ द्वयोः श्लोकयोः ससन्दर्भं भावार्थं लिखत ।** **०८**

(१) *जाते विप्रोदशाहेन द्वादशहेन भूमिपः ।*
*वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥*

(२) *देवाङ्गनाः सहस्राणि शूरमायोधने हतम् ।*
*त्वरमाणा प्रधावन्ति मम भर्ताममेति च ॥*

(३) *अपृष्ट्वा चैव भर्तारं या नारी कुरुते वृतम् ।*
*सर्वं तद् राक्षसान् गच्छेत् इत्येवं मनुरब्रवीत् ॥*

**प्रश्नः ६ एकस्य सविस्तरमुत्तरं ददत ।** **०८**

(१) *'चोदना लक्षणो धर्मः' इत्युक्तिं सविस्तृतां वर्णयत ।*

(२) *'सम्पर्केषु निवृत्तस्य न प्रेतं नैव सूतकम्' इत्युक्ति व्याख्यायत ।*

**प्रश्नः ७ एकस्य टिप्पणी लेख्या ।** **०२**

*(१) सव्रतः ।* *(२) औरसपुत्रः ।*

**प्रश्नः ८ द्वयोः लघूत्तरे देये ।** **०२**

*(१) को नाम दत्तकपुत्रः ?*

*(२) जितेन किं लभ्यते ?*

*(३) चतुर्थाध्याये कति श्लोकाः सन्ति ?*

*(४) चतुर्थाध्याये किं वर्णितम् ?*

**तृतीयान्वितिः ( युनिट - ३ )**

**प्रश्नः ९ निम्नाङ्कितेषु द्वयोः ससन्दर्भं भावार्थं लिखत ।** **०८**

(१) *हत्वा मूषक मार्जार सर्पाऽजगर डुण्डुभान् ।*
*कृसरं भोजयेद्विप्रान् लोहदण्डं च दक्षिणाम् ॥*

(२) *गवां शृङ्गोदकौ स्नानं महानद्योस्तु सङ्गमे ।*
*समुद्र दशमाद्वापि शुना दष्टः शुचिभवेत् ॥*

(३) *ब्राह्मणाः जङ्गमं तीर्थं तीर्थभूता हि साधवः ।*
*तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिनाः जनाः ॥*

**प्रश्नः १० एकस्य सविस्तृतमुत्तरं ददत ।** **०८**

(१) *पञ्चमाध्यायान्तर्गतं शुद्धिविचारं वर्णयत ।*

(२) *श्रुतिस्मृत्योर्कः भेदः वर्णयत ।*

**प्रश्नः ११ द्वयोः टिप्पणी लेख्या ।** **०४**

*(१) अतिकृच्छ्रम् ।* *(२) धर्मः ।*

*(३) पापाचारः ।* *(४) ब्राह्मणाः जङ्गमं तीर्थम् ।*

**प्रश्नः १२ पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) कीदृश्यां स्थितौ भोजनं न कर्तव्यम् ?*

*(२) मक्षिकादि कीटक दूषिते भोजने किं कर्तव्यम् ?*

*(३) शूद्रः केन शुद्ध्यति ? उपवासेन वा दानेन ?*

*(४) चाण्डालेन सह सुप्ते सति शुद्ध्यर्थं किं कर्तव्यम् ?*

*(५) षष्ठाध्याये कति श्लोकाः सन्ति ?*

*(६) षष्ठाध्याये किं वर्णितम् ?*

*(७) पाराशरस्मृते कर्तुः नाम किम् ?*

=०=